सदच्चिणापथाः च्चयं व्रजन्त्यशिवमरुद्गदोद्भवैः । निहन्ति शुक्रः च्चितिजेऽग्रतः प्रजा हुताशशस्त्रचुदुद्दष्टितस्करैः । चराचरं व्यक्तमथोत्तरापथं दिशोऽग्निविद्युद्रजसा च पीडयेत् । वृहस्पतौ हन्ति पुरःस्थिते सितः सितं समस्तं द्विजगोसुरालयान् । दिशं च पूर्वां करकाम्बुजोऽम्बुदा गलेगदा भूरि भवेच्च शारदम् । सौम्योऽस्तोदययोः पुरो भृगुसुतस्यावस्थितस्तोयहृद् रोगान् पित्तजकामलांश्च कुरुते पुष्णाति च ग्रैष्मिकम् । हन्यात् प्रव्रजिताग्निहोत्रिकभिषग्रङ्गोपजीव्यान् हयान् वैश्यान् गाः सह वाहनैर्नरपतीन् पीतानि पश्चाद्दिशम् । शिखिभयमनलाभे शस्त्रकोपश्च रक्ते कनकनिकषगौरे व्याधयो दैत्यपूज्ये । हरितकपिलरूपे श्वासकासप्रकोपः पतति न सलिलं खाद्भस्मरूचासिताभे । दधिकुमुदशशाङ्ककान्तिभृत् स्फुटविकसत्किरणो वृहत्तनुः ।सुगतिरविकृतो जयान्वितः कृतयुगरूपकरः सिताह्वयः” “उशने काव्याय”ऋ०६,२०,११।“उशने उशनसे”भा०छान्दसम् ।

**उशनसस्तोम** पु० उशनसः स्तोमो यत्र अलुक्समा० वा विसर्गस्य लुक् । एकाहसाध्ये यागभेदे “उशनसस्तोमेन गरगीर्णमिवात्मानं मन्यमानो यजेत”आ०श्रौ०९,५,१ । “उशनसस्तोमोनाम एकाहसाध्यः पुनः स्तोम इति चास्यैव संज्ञा गरोविषं गीर्णं येन स गरगीर्णः यो बहुप्रतिग्रहादिना पापादिभयात् गरगीर्णमिवात्मानं मन्यते स एतेन यजेत” नारा० वृ० “उशना यत् सहस्यैरयातं त्वमपीयदवेतुर्वशायेति सूक्तमुखीये” इति तत्रैव सूक्तप्रारम्भः २सूत्रे उक्तः ।

**उशाना** स्त्री वश–ताच्छील्ये चानश् । सोमसाधनभूतायां गिरिजातायामोषधौ । “यद्युदाप्यायन्ति देवो वै सोमो दिवि हि सोमो वृत्रो वै सोम आसीत् तस्यैतच्छरीरं यद्गिरयः यदश्मानस्तदैषोशाना नामौषधिर्जायत इति स्माह श्वेतकेतुरुद्दालकिस्तामेतदाहृत्याभिषुण्वन्ति” शत०ब्रा० ३,४,३,२० । “उशानाख्या ओषधिर्जायते इत्येवं श्वेतकेतुराह अतस्तामेव गिरावुत्पन्नाम् इदानीन्तना यजमाना अभिषुण्वन्ति न साचात् सोमम्” भा० ।

**उशिज्** पु०वश–इजि किच्च सं प्र०। १अग्नौ २घृते च उज्ज्व० तत्र वह्नेः हविःकामयमानत्वात्, घृतस्य तु काम्यमानत्वात् तथात्वम् । ३कामयमाने त्रि० । “उशिगसि कविरिति” “उशिगसि वसुभ्य इति”च ता०ब्रा०“इषद्दुशिजोयथाविदः” ऋ० १, १३१,५, “उशिजः कामयमानान् यजमानान्” भा०। उशिजोमनीषिणः” ऋ० २,२१,२, “उशिज इन्द्रं कामयमानान्” भा० । “स हव्यवाडमर्त्य उशिग्दूतश्च लोहितः” ३,११,२ । “उशिक् हविःकामयमानः” भा०उशिजोयविष्ठो वह्नितमानाम्” ३,१५,२२। “प्र पूर्वादिगुरुशिजः”यजु०“उशिजः हवींषि कामयमानान्”वेददी०४काम्ये‘उशिक् त्वं देव ! सोमाग्नेः प्रियं पाथोऽपीहि” यजु०८,५५ “उशिक् काम्यमानः” वेददीपः । “उशिगसि कविः” ५,२२, । उशिक्कामयमानः” वेददी० ५अन्ने तस्य काम्यमानत्वात्तथात्वम् । “उशिजा वसुभ्योवस्तून् जिन्वः” यजु० १५,६ । उशिजा वश कान्तौ इति उशिगन्नं तेन”वेददी०। ततः प्रज्ञा० स्वार्थे ण। औसिजः उक्तार्थे । करणे इजि । ६इच्छाहेतौ मेधायाम् निरु० । मेधारूपज्ञानस्येच्छाहेतुत्वात् तथात्वम् । ततः अस्त्यर्थे अर्श० अच् । उशिजः मेधाविनि त्रि० निरु०

**उशी** स्त्री वश–ई–संप्र० । इच्छाभेदे उशीनरः ।

**उशीनर** पु० १वृष्णिवंशोद्भवे चत्रियभेदे ।‘उशीनरस्य विक्रान्तो वृष्णयस्ते प्रकीर्त्तिताः”भा०आ०१८६अ०। २पौरवे नृपभेदे ‘शृणु पुरोर्महाराज ! वंशमुत्तमपौरुषम्” इत्युपक्रम्य ‘सृञ्जयस्याभवत् पुत्रो वीरो राजा पुरञ्जयः । जनमेजयो महाराजो पुरञ्जयसुतोऽभवत् । जनमेजयस्य राजर्षेर्महाशीलोऽभवत् सुतः । महामना नाम सुतो महाशीलस्य धार्मिकः । महामनास्तु द्वौ पुत्रौ जनयामास भारत ! । उशीनरं च धर्मज्ञं तितिचुञ्च महाबलम्” हरिवं० ३१अ० तस्य चरितं वर्णितम्” भा०व० “अत्रागच्छन्नृपवरं ज्ञातुमग्निः सवासवः । जिज्ञासमानो वरदो महात्मानमुशीनरम् । इन्द्रःश्येनः कपोतोऽग्निर्भूत्वा यज्ञेऽभिजग्मतुः । ऊरुं राज्ञः समासाद्य कपोतः श्येनजाद्भयात् । शरणार्थी तदा राजन् ! निलिल्ये भयपीड़ितः” १३०अ० । “श्येन उवाच । धर्म्मात्मानं त्वाहुरेकं सर्व्वे राजन्महीक्षितः । स वै धर्म्मविरुद्धं त्वं कस्मात् कर्म्म चिकीर्षसि ? । विहितं भक्षणं राजन् ! पीड्यमानस्य मे चुधा । मा रचीर्धर्म्मलोभेन धर्म्ममुत्सृष्टवानसि । राजोवाच । सन्त्रस्तरूपस्त्राणार्थी त्वत्तो भीतो महाद्विज ! । मत्सकाशमनुप्राप्तः प्राणगृध्नुरयं द्विजः । एवमभ्यागतस्येह कपोतस्याभयार्थिनः । अप्रदाने परं धर्म्मं कथं श्येन ! न पश्यसि ? । प्रस्पन्दमानः संभ्रान्तः कपोतः श्येन ! लच्यते । मत्सकाशे जीवितार्थी